Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

gyanmandir@kobatirth.org

# अथअनंतचतुर्दशीपूजाप्रारंभः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीगणेशायनमः॥ ॥अथअनंतपूजाविधिः॥ ॥प्रातर्माध्यान्हिकंस्नात्वानित्यकर्मसमाप्यच
अनंतन्हृदयेकृत्वाशक्र्विस्तत्रसमाहितः॥अव्रणंकलशंचैववस्त्रयुग्मेनवेष्टितम्॥मुष्टिमात्रेणदर्भै
स्तु फणिराजंचकारयेत्॥स्थापयेत्कलशस्याग्रेजगदाधारमव्ययम्॥आराधयेदनंतंचतस्मिन्कुंभे
विशेषतः॥गोचर्ममात्रमालिप्यगोमयेनविचक्षणः॥तन्मध्येस्थंडिलंकृत्वापद्ममष्टदलंलिखेत्॥
तस्योपरिन्यसेत्कुंभंचूतपल्लवसंयुतम्॥प्राणायामंततः कृत्वातिथ्यादिपरिकल्पयेत्॥ममसहकु
टुंबस्यक्षेमस्थैर्यआयुरारोग्यचतुर्विधपुरुषार्थसिद्ध्यर्थंममआचरितस्यआचीर्यमाणस्यव्रतस्यसं
पूर्णफलावाप्त्यर्थंश्रीमदनंतदेवताप्रीत्यर्थंयथाज्ञानेनयथामिलितोपचारद्रव्यैः ध्यानावाहनादिषोड
शोपचारैः पुजांकरिष्ये॥ तथाचआसनादिकलशाराधनंकरिष्ये॥ कलशस्य॰ सर्वेसमुद्राः॰ सितासि-
ते॰ कलशेवरुणंसंपूज्य॥ ततोशंखंघंटांचपूजयेत्॥ अपवित्रःप॰ पूजाद्रव्याणिआत्मानंचप्रोक्षयेत्॥
यमुनांपूजयेत्॥ श्रीमदनंतव्रतांगत्वेनश्रीयमुनापूजनंकरिष्ये॥ तद्यथा॥ लोकपालस्तुतांदेवीमिं-
द्रनीलसमुद्भवाम्॥ यमुनेत्वामहंध्यायेत्सर्वकामार्थसिद्धये॥ ध्यानं॰॥ सरस्वतिनमस्तुभ्यंसर्वकाम

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रदायिनि॥आगच्छदेवियमुनेव्रतसंपूर्णहेतवे॥इमंमेगंगेइत्यावाह्य॥सिंहासनेसमारूढेदेवशक्ति
समन्विते॥सर्वलक्षणसंपूर्णेयमुनायैनमोस्तुते॥आसनं॰॥रुद्रपादेनमस्तुभ्यंसर्वलोकहितप्रिये॥
सर्वपापप्रशमनितरंगिण्यैनमोस्तुते॥पाद्यं॰॥गरुडपादेनमस्तुभ्यंशंकरप्रियभामिनि॥सर्वकाम-
प्रदेदेवियमुनेतेनमोनमः॥अर्घ्यं॰॥विष्णुपादोद्भवेदेविसर्वाभरणभूषिते॥कृष्णामूर्तेमहादेविकृष्णा
वेण्यैनमोनमः॥आचमनं॰॥सर्वपापहरेदेविविश्वप्रियप्रदर्शिनि॥सौभाग्यंयमुनेदेहियमुनायैनमोस्तु
ते॥मधुपर्कस॰॥नंदिपादेमहादेविशंकरार्धशरीरिणि॥सर्वलोकहितेदेविभीमरथ्यैनमोस्तुते॥पंचामृ
तस्नानं॰॥सिंहपादोत्तमेदेविनारसिंहसमप्रिये॥सर्वलक्षणसंपूर्णेभवनाशिनितेनमः॥शुद्धोदकस्ना
नं॰॥विष्णुपादाब्जसंभूतेगंगेत्रिपथगामिनि॥सर्वपापहरेदेविभागीरथ्यैनमोस्तुते॥श्वेतवस्त्रं॰॥त्र्यं
बकजटोद्भूतेगौतमस्याघनाशिनि॥सप्तधासागरंयातिगोदावरिनमोस्तुते॥कंचुकीं॰॥माणि-
क्यमुक्तावलिभिर्गोस्तुभांश्चगोमेदवैडूर्यस्तुपुष्परागैः॥वज्रैश्चनीलैश्चसुशोभितानिगृहाणस-
र्वाभरणानिदेवि॥आभरणानि॰॥चंदनागरुकस्तूरीरोचनंकुंकुमंतथा॥कर्पूरेणसमायुक्तंगं



For Private and Personal Use Only

धंदद्मिन्वभक्तितः॥ गंधं०॥ श्वेतांश्चचंद्रवर्णाभान्हरिद्रारागरंजितान्॥ अक्षतांश्चसुरश्रेष्ठेददामि-
यमुनेशुभे॥ अक्षतान्०॥ मंदारमालतीजातीकेतकीपाटलैःशुभैः॥पूजयामिन्वदेवेशियमुनेभक्तव-
त्सले॥पुष्पाणि०॥ ॥अथांगपूजा॥ ॥चंचलायैनमः पादौपूजयामि चपलायै० जानुनीपू०
भक्तवत्सलायै० कटीपू० हरायै० नाभिंपू० मन्मथवासिन्यै० गुह्यंपू० अज्ञानवासिन्यै० हृदयंपू० भद्रा
यै० स्तनौपू० अघहंत्र्यै० भुजौपू० रक्तकंठ्यै० कंठंपू० भवहृत्यै० मुखंपू० गौर्यैनि० नेत्रेपू० भागीरथ्यै० ल
लाटंपू० यमुनायै० शिरःपूज० सरस्वत्यै० सर्वांगंपू०॥ ॥अथनामपूजा॥ ॥यमुनायै० सितायै० कम
लायै० उत्पलायै० अभीष्टप्रदायै० धात्र्यैन० हरिहररूपिण्यै० गंगायै० नर्मदायै० गौर्यैन० भागीरथ्यै० तुं
गायै० भद्रायै० कृष्णावेण्यै० भवनाशिन्यै० सरस्वत्यै० कावेर्यै० सिंधवेन० गौतम्यैनमः गोमत्यै० गाय-
त्र्यै० गरुडायै० गिरिजायै० चंद्रचूडायै० सर्वेश्वर्यै० महालक्ष्म्यै० सर्वपापहरेदेवि सर्वोपद्रवनाशिनि॥
सर्वसंपत्प्रदेदेवियमुनायैनमोस्तुते॥ ॥इतिनामपूजा॥ ॥दशांगंगुग्गुलोद्भूतश्चंदनागरुसंयुतः
कपिलाघृतसंयुक्तोधूपोयंप्रतिगृह्यताम्॥ धूपंस०॥ घृतवर्तिसमायुक्तंवन्हिनायोजितंमया॥गृहाण

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दीपकंदेविसर्वैश्वर्यप्रदायिनि॥दीपं०॥शर्करामधुसंयुक्तंदधिक्षीरंचसर्पिषा॥पक्वमन्नंमयादत्तंनैवे
द्यंप्रतिगृह्यताम्॥नैवेद्यं०॥पानीयंपावनंश्रेष्ठंगंगादिसरिदुद्भवम्॥हस्तप्रक्षालनंदेविगृहाणमुख-
शोधनम्॥हस्तप्रक्षालनं०॥मुखप्रक्षालनं०॥कर्पूरेणसमायुक्तंयमुनेचारुचंदनम्॥समर्पितंमयातु
भ्यंकरोद्वर्तनकंकुरु॥करोद्वर्तनार्थेचंदनं०॥इदंफलमितिफलं०॥पूगीफलमितितांबूलं०॥हिरण्यगर्भे
तिदक्षिणां॥त्रैलोक्यपावनेगंगेअंधकारविनाशिनि॥पंचार्तिक्यंगृहाणेदंविश्वप्रीत्येनमोस्तुते॥आ
र्तिक्यं०॥केतकीजातिकुसुमैर्मल्लिकामालतीभवैः॥पुष्पांजलिर्मयादत्तोरुद्रप्रीत्यैनमोस्तुते॥पुष्पांजलिं
स०॥यानिकानीतिप्रद०॥अन्यथाशरणं०॥नमस्कारान्०॥सुरासुरेंद्रादिकिरीटमौक्तिकैर्युक्तंसदायत्तव
पादपंकजं॥परावरंपातुवरंसुमंगलंनमामिभक्त्याममकामसिद्धये॥भवानिचमहालक्ष्मिसर्वकामप्र-
दायिनि॥व्रतसंपूर्णतांयातुयमुनायैनमोस्तुते॥इतिप्रार्थना॥इतियमुनापू०समा०॥यमुनाकलशोपरि
पूर्णपात्रंनिधायतस्योपरिसप्तफणायुतंशेषंसंस्थाप्यपूजयेत्॥अथध्यानं॥ब्रह्मांडाधारभूतंचयमु-
नांतरवासिनाम्॥फणासप्तसमायुक्तंध्यायेनंतंहरिप्रियम्॥ध्यायामि॥शेषंसप्तफणायुक्तंकालपन्नग



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नायकम्॥ अनंतशयनार्थंत्वां भक्त्यात्वावाहयाम्यहम्॥ आवाहनं०॥ नवनागकुलाधीशशेषोद्धारककाश्यप॥ ना
नारत्नसमायुक्तमासनंप्रतिगृह्यताम्॥ आसनं०॥ अनंतप्रियशेषेशजगदाधारविग्रह॥ पाद्यंगृहाणभक्त्या-
त्वंकाद्रवेयनमोस्तुते॥ पाद्यं०॥ कश्यपानंदजनकमुनिवंदितभोप्रभो॥ अर्घ्यंगृहाणसर्वज्ञसादरंशंकरप्रिय
॥अर्घ्यं०॥ सहस्रफणिरूपेणवसुधोद्धारकप्रभो॥ गृहाणाचमनंदेवपावनंचसुशीतलम्॥ आचमनं०॥ कुमार
रूपिणेतुभ्यंदधिमध्वाज्यसंयुतम्॥ मधुपर्कंप्रदास्यामिसर्पराजनमोस्तुते॥ मधुपर्कं०॥ ततः पंचामृतस्नानं०
गंगादिपुण्यतीर्थैस्त्वामभिषिंचेयमादरात्॥ बलभद्रावतारेशनंदजः श्रीपतेः सखिन्॥ स्नानं०॥ कौशेययुग्मं
देवेशप्रीत्यातवमयार्पितम्॥ पन्नागाधीशनागेशतार्क्ष्यशत्रोनमोस्तुते॥ वस्त्रं०॥ सुवर्णनिर्मितंसूत्रंग्रथितंकं
ठहारकम्॥ अनेकरत्नैः स्वचितंसर्पराजनमोस्तुते॥ यज्ञोप०॥ अनेकरत्नान्वितहेमकुंडलेमाणिक्यसंकाशि
तकंकणद्वयम्॥ हैमांगुलीयंकृतरत्नमुद्रिकंहैमंकिरीटंफणिराजतेर्पितम्॥ सर्वाभरणं०॥ श्रीरकंडं०॥ चंदनं०॥
अक्षताश्चसु०॥ अक्षतान्०॥ करवीरैर्जाति०॥ पुष्पं०॥ अथांगपूजा॥ सहस्रपादाय०पादौपू० गूढगुल्फाय०गु
ल्फौ० हेमजंघाय० जंघेपू० मंदगतयेन० जानुनीपू० पीतांबरधरा० कटीपू० गंभीरनाभा० नाभिंपू० पवनाशना०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उदरं० उदराय० हस्तौ० कालियाय० भुजौ० कंबुकंठा० कंठं० विषवक्त्राय० वक्त्रं० फणाभूषणाय० ललाटं० लक्ष्मणा
य० शिरः पू० अनंतप्रियाय० सर्वांगं पू० इत्यंगपूजा॥ वनस्पति०॥ धूपं०॥ साज्यंचेतिदीपं॥ नैवेद्यंगृ०॥ नैवेद्यं०॥
मध्येपानीयं०॥ करोद्वर्तनार्थेचंद०॥ पूगीफलं०॥ तांबूलं०॥ इदंफलमितिफलं०॥ हिरण्यगर्भेतिदक्षिणां०॥ श्रि
येजातमितिनीराजनं०॥ नानाकुसुमसंयुक्तांपुष्पांजलिमिमांप्रभो॥ कश्यपानंदजनकसर्पेशप्रतिगृह्यता
म्॥ मंत्रपुष्पं०॥ यानिकानि०॥ प्रदक्षिणा०॥ नमोस्त्वनं०॥ नमस्कारान्०॥ अनंतकल्पोक्तफलंदेहिमेत्वमही
श्वर॥ त्वत्पूजारहितश्चार्ड्फलंप्राप्नोतिमानवः॥ प्रार्थना॥ इतिशेषपूजा॥ मंडपद्वारपूजा॥ प्राग्द्वारे द्वार
श्रियै० नंदायै० सुनंदायै० धात्र्यैनमः विधात्र्यै० चिच्छक्त्यै० शंखनिधये० पद्मनिधये० दक्षिणद्वारे द्वारश्रियै०
चंडायै० प्रचंडायै० धात्र्यैन० विधात्र्यै० चिच्छक्त्यै० मायाशक्त्यैनमः शंखनिधये० पद्मनिधये० पश्चिमद्वारे
द्वारश्रियै० बलायै० प्रबलायै० धात्र्यै० विधात्र्यै० चिच्छक्त्यै० मायाशक्त्यै० शंखनिधये० पद्मनिधये० उत्तरद्वा
रे द्वारश्रियै० महाबलायै० प्रबलायै० धात्र्यै० विधात्र्यै० चिच्छक्त्यै० मायाशक्त्यै० शंखनिध० पद्मनिधये०॥ अ
थपीठपूजा॥ मध्येवास्तुपुरुषाय० मंडूकाय० कालाग्निरुद्राय० आधारशक्त्यै० कूर्माय० पृथिव्यै० अमृता



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्णवाय॰ श्वेतद्वीपाय॰ कल्पवृक्षेभ्यो॰ मणिमंदिराय॰ हेमपीठायन॰ धर्माय॰ अधर्मा॰ ज्ञानाय॰ वैराग्याय॰ ऐ-
श्वर्याय॰ अनैश्वर्याय॰ सहस्रफणान्वितअनंताय॰ सर्वतत्वा॰ पद्माय॰ आनंदकंदा॰ संविन्नाला॰ विकारम
यकेसरेभ्योन॰ प्रकृतिमयपत्रेभ्यो॰ सूर्यमंडला॰ चंद्रमंडला॰ वन्हिमंडला॰ संसत्वाय॰ रंरजसे॰ तंतमसे॰
आत्मने॰ परमात्मने॰ अंतरात्म॰ ज्ञानात्म॰ प्राणात्म॰ कालात्म॰ विद्यात्म॰ पूर्वादिदशदिक्ष जयायै॰ विजया-
यै॰ अजिता॰ अपराजिता॰ नित्यायै॰ विलासिन्यै॰ दोग्ध्रे॰ अघोरा॰ मंगलायै॰ आधारशक्तिकमलासनायै॰॥
इतिपीठपूजा॥ अस्यश्रीप्राणप्रतिष्ठामंत्रस्य॥ ब्रह्माविष्णुमहेश्वराऋषयः॥ ऋग्यजुःसामाथर्वाणिछंदां
सि॥ पराप्राणशक्तिर्देवता॥ आंबीजं॥ ह्रींशक्तिः॥ क्रोंकीलकं॥ श्रीमदनंतस्यप्राणप्रतिष्ठापनेविनियोगः॥
ॐ आंह्रींक्रोंअंयंरंलंवंशंषंसंहंळंक्षंअः क्रोंह्रींआंमदनंतस्यप्राणइहप्राणाः॥ ॐ आंह्रीं॰ जीवइहस्थिताः
॥ ॐ आंह्रीं॰ आंसर्वेंद्रियाणिवाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थइहागत्यसुखं-
चिरंतिष्ठंतुस्वाहा॥ असुनीते॰ चत्वारिवाक्॰ गर्भाधानादिसंस्कारसिध्यर्थंपंचदशप्रणवावृत्तिंकरिष्ये
॥ ॐ १५॥ रक्तांभोधि॰ परानः॥ अनंतपूजा॥ ततस्तुमूलमंत्रेणनमस्कृत्यजनार्दनम्॥ नवाम्रपल्लवाभा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





संपिंगश्मश्रुलोचनम्॥पीतांबरधरंदेवंशंखचक्रगदाधरम्॥अलंकृतसमुद्रस्थंविश्वरूपंविचिंतये॥
ध्यायामि॥आगच्छानंतदेवेशतेजोराशेजगत्पते॥इमांमयाकृतांपूजांगृहाणपुरुषोत्तम॥सहस्रशी०॥आ
वाहनं॥विष्टरंधेहिगोविंदगोवर्धनधरप्रभो॥अनंतंदीयतेयन्मेरत्नसिंहासनेविश॥पुरुष०॥आसनं०॥
यथात्वंसर्वदेवानामिंद्रादीनांचरक्षसि॥तथामांपालयानंतत्वदंघ्रिशरणांगतम्॥एतावा०॥पाद्यं०॥अनंतानं
तदेवेशअनंतफलदायक॥अनंतानंतरूपोसिगृहाणार्घ्यंनमोस्तुते॥त्रिपादू०॥अर्घ्यं०॥गंगोदकंसमानी
तंहेमकुंभेनयोजितम्॥आचम्यतांहृषीकेशप्रसीदपुरुषोत्तम॥तस्माद्विरा०॥आचम०॥अनंतगुणरूपा
यविश्वरूपधरायच॥नमोमाहात्म्यदेवायअनंतायनमोनमः॥यत्पुरु०॥स्नानं०॥ततःपंचामृतस्ना०॥स्ना
रभेस्तुसमुत्पन्नंदेवानामपिदुर्लभम्॥पयोददामिदेवेशस्नानार्थंप्रतिगृह्यताम्॥आप्याय०॥पयःस्नानं०॥
चंद्रमंडलसंकाशंसर्वदेवप्रियंहियत्॥दधिंददामिदेवेशस्नानार्थंप्रतिगृह्यताम्॥दधिक्राव्णोअकारिष
मितिदधिस्नानं०॥आज्यंसुराणामाहारआज्यंयज्ञेप्रतिष्ठितम्॥आज्यंपवित्रंपरमंस्नानार्थंप्रतिगृह्यताम्
॥घृतंमिमिक्षेइतिघृतस्नानम्॥सर्वौषधिसमुत्पन्नंपीयूषंसदृशंमधु॥स्नानायतेमयादत्तंगृहाणपरमेश्व



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र॥मधुवातेतिमधु॥इक्षुदंडात्समुद्भूतांशर्करांमधुरांशुभाम्॥स्नानायतेमयादत्तांगृहाणपरमेश्वर॥स्वादुः
पवस्वेतिशर्करास्नानं॥शुद्धोदकस्नानं०॥नाममंत्रैः पूर्वपूजांकुर्यात्॥ ॥पुरुषसूक्तेन अभिषेकः॥ ॥
तप्तकांचनवर्णाभंकौशेयंचसुनिर्मितम्॥वस्त्रंगृहाणदेवेशलक्ष्मीयुक्तनमोस्तुते॥तंयज्ञमितिवस्त्रं०
वस्त्रानंतरमाचमनीयं॥दामोदरनमस्तेस्तुत्राहिमांभवसागरात्॥ब्रह्मसूत्रंसोत्तरीयंगृहाणपुरुषो-
त्तम॥यज्ञोपवीतंपरमंपवित्रं०॥तस्माद्यज्ञात्सर्वहुतइतिचंदनं०॥अक्षताश्चसुरश्रेष्ठाः० अलंकारार्थे-
अक्षतान्०॥माल्यादीनिसुगंधीनि०॥तस्मादश्वेतिपुष्पं०॥अथग्रंथिपूजा॥ ॥श्रियैनमः० मोहिन्यै० प
द्मिन्यैनम० महाबलायै० अजायै० मंगलायै० वरदायै० शुभायै० अजायै० विजयायै० जयंत्यैनमः पापना
शिन्यै० विश्वरूपायै० सर्वमंगलायै० इतिग्रंथिपूजा॥ ॥अथांगपूजा॥ ॥मत्स्यायनमः पादौपूजया
मि कूर्माय० गुल्फौ० वराहाय० जानुनी० नारसिंहाय० ऊरू० वामनाय० कटीपू० रामाय० उदरं० श्रीरामा
य० हृदयं० कृष्णाय० मुखं० सहस्रशिरसे० शिरः पूज० श्रीमदनंता० सर्वांगंपू०॥अथावरणपूजा॥अ
नंतस्यदक्षिणपार्श्वेरमायै० वामपार्श्वेभूम्यै० इतिप्रथमावरणं॥आवरणदेवतामावाह्यहस्तंप्रक्षाल्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गंधपुष्पंतर्जनीमध्यमांगुष्टैर्गृत्वामध्येशंखेोदकंगृहीत्वामंत्रांतेशंखोदकंभूमौनिक्षिप्यपुष्पंदेवोपरिनि
क्षिपेत्॥ दयाब्धेत्राहिसंसारसर्पान्मांशरणांगतम्॥ भक्त्यासमर्पयेत्तुभ्यंप्रथमावरणार्चनम्॥ इतिमं
त्रमुच्चार्यजलंत्यक्त्वापुष्पंदेवोपरिन्यसेत्॥ इतिपूर्वादिक्रमेण॥ इन्द्रोल्काय॰ महोल्काय॰ शतो ल्का
य॰ सहस्रोल्काय॰ दयाब्धेत्राहिसंसार॰ द्वितीयावरणं॰२ तथैव वासुदेवाय॰ संकर्ष॰ प्रद्युम्नाय॰ अनि
रुद्धा॰ दयाब्धेत्राहि॰ तृतीयावर॰३ प्राच्यां केशवाय॰ नारायणाय॰ माधवाय॰ गोविंदाय॰ विष्णवेन॰
मधुसूदना॰ त्रिविक्रमा॰ वामनाय॰ श्रीधराय॰ हृषीके॰ पद्मनाभाय॰ दामोदराय॰ दयाब्धेत्राहिसंसा
चतुर्थावरणं॰४ पूर्वादिक्रमेण मत्स्याय॰ कूर्माय॰ वराहाय॰ नारसिंहाय॰ वामनाय॰ रामाय॰ श्रीरामा
य॰ कृष्णाय॰ बौद्धाय॰ कल्किने॰ अनंतायन॰ विश्वरूपिणेन॰ दयाब्धेत्राहि॰ पंचमा॰५ पूर्वादिक्र-
मेण अनंताय॰ दक्षिणायां ब्रह्मणेन॰ पश्चिमायां वायवे॰ उत्तरायां ईशानाय॰ आग्नेय्यां वारुण्यै॰
नैर्ऋत्यां गायत्र्यै॰ वायव्यां भारत्यैन॰ ईशान्यां गिरिजायै॰ अग्रेगरुडायन॰ वामेस्रुपुण्यायन॰ दया
ब्धेत्राहि॰ षष्ठावरणं॰६ पूर्वादिक्रमेण इंद्राय॰ अग्नये॰ यमायन॰ नैर्ऋतये॰ वरुणाय॰ वायवेन॰ सो



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

माय॰ ईशानाय॰ दयाब्धेत्राहि॰ सप्तमावरणं॰ ७ आग्नेय्यांशेषाय॰ नैर्ऋत्यां विष्णवे॰ वायव्यां विधयेन॰ ईशा-
न्यां प्रजापतये॰ दयाब्धेत्राहि॰ इत्यष्टमावरणं॰ ८ आग्नेय्यांगणपतये॰ नैर्ऋत्यां सप्तमातृभ्यो॰ वायव्यां दुर्गा-
यै॰ ईशान्यांक्षेत्राधिपतये॰ दयाब्धेत्राहिसं॰ नवमावरणं॰ ९ मध्येब्रह्मणेन॰ भास्कराय॰ शेषाय॰ सर्वव्या-
पिने॰ ईश्वराय॰ विश्वरूपाय॰ महाकामाय॰ सृष्टिकर्त्रेन॰ कृष्णाय॰ हरये॰ शिवाय॰ स्थितिकारकाय॰ अंत
काय॰ दयाब्धेत्राहिसं॰ इतिदशमावरणं॰ १० शौरये॰ वैकुंठाय॰ महाबलाय॰ पुरुषोत्तमाय॰ अजाय॰ पद्म-
नाभाय॰ मंगलाय॰ हृषीकेशाय॰ वरदाय॰ माधवाय॰ मधुसूदनाय॰ अच्युताय॰ अनंताय॰ गोविंदाय॰ वि
जयाय॰ अपराजिताय॰ कृष्णाय॰ दयाब्धेत्राहि॰ इतिएकादशावरणं॰ ११ अनंताय॰ कपिलाय॰ शेषाय॰
संकर्षणाय॰ हलायुधाय॰ तारणाय॰ सीरपाणये॰ बलभद्राय॰ दयाब्धेत्राहिसं॰ इतिद्वादशावरणं॰॥ १२॥
क्षीराब्धिशायिने॰ अच्युताय॰ भूम्याधाराय॰ लोकनाथाय॰ फणामणिविभूषणाय॰ सहस्रमूर्ध्नेन॰ सहस्रा
त्रिषेन॰ दयाब्धेत्राहिसं॰ इतित्रयोदशावरणं॰ १३ केशवादिच्चतुर्विंशतिनामभिः दयाब्धेत्राहिसं॰ इतिच्चतु
र्दशावरण॰ १४ अथपत्रपूजा कृष्णायन॰ पलाशपत्रं॰ विष्णवे॰ औदुंबरप॰ हरयेन॰ अश्वत्थपत्रं॰ शं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भवेन० भृंगिराजप० ब्रह्मणेनमः जटाधरप० भास्कराय० अशोकप० शेषायन० कपित्थपत्रं० सर्वव्यापिने० व
टप० ईश्वराय० आम्रप० विश्वरूपि० कदलीप० महाकायाय० अपामार्गप० सृष्टिकर्त्रे० करवीरप० स्थितिक
र्त्रेन० पुन्नागप० अंतकाय० नागवल्लीप० १४ अथपुष्पपूजा अनंताय० पद्मपुष्पं० विष्णावेन० जातीपु
ष्पं० अव्ययाय० कल्हारपुष्पं० सहस्त्रजितेन० केतकीपु० अनंतरूपिणेन० बकुलपुष्पं० इष्टाय० शतपुष्पं०
विशिष्टाय० पुन्नागपु० शिष्टेष्टाय० करवीरपु० शिखंडिने० धत्तूरपुष्पं० नहुषाय० कुंदपुष्पं० विश्वबाहवे० म
ल्लिकापु० महीधराय० मालतीपु० अच्युताय० कर्णिकापुष्पं० १४ अष्टोत्तरशतनामभिः पूजयेत
अनंताय० अच्युताय० अद्भुतकर्मणे० अमितविक्रमाय० अपराजिताय० अखंडाय० अग्निनेत्राय० अग्नि
र्वपुषेन० अदृश्याय० अत्रिपुत्राय० १० अनुकूलाय० अनाशिने० अनघाय० अप्स्नीलाय० अहरहाय० अ
ष्टमूर्तये० अनिरुद्धाय० अनिर्विष्टाय० अचंचलाय० अब्दादिकाय० २० अचलरूपाय० अखिलधराय०
अव्यक्ताय० अनुरूपाय० अभयंकराय० अक्षताय० अवपुषेन० अयोनिजाय० अरविंदाक्षाय० अशनव
र्जिताय० अधोक्षजाय० ३१॥ आदिपुत्राय० अंबिकापतिपूर्वजाय० अपस्मारनाशिने० अव्ययायन०



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनादिने॰ अप्रमेया। य॰ अघशत्रवे॰ अमरारिघ्नाय॰ अनीश्वराय॰ अजायन॰ ४१ अघोराय॰ आनादिनिधना॰
अमरप्रभवे॰ अग्राह्याय॰ अक्रूराय॰ अनुत्तमाय॰ अरूपाय॰ अर्न्हेन॰ अमोघाधिपत॰ अजाय॰ ५० अक्षमा
य॰ अमृताय॰ अघोरवीर्याय॰ अव्यंगाय॰ अविघ्नाय॰ अतींद्रियाय॰ अमिततेजसेन॰ अमितये॰ अष्टमूर्तये॰
अनिलाय॰ अवशाय॰ अणोरणीयसे॰ अशोकाय॰ अरविंदाक्षाय॰ अधिष्ठाय॰ अमिततनया॰ अरण्यवा-
सिने॰ अप्रमत्ताय॰ अनंतरूपाय॰ अनलाय॰ अनिमिषाय॰ अरूपरूपाय॰ अग्रगण्याय॰ अप्रमिताय॰ अंत
काय॰ अचिंत्यायन॰ अपांनिधये॰ अतिसुंदराय॰ अमरप्रिया॰ अष्टसिद्धिप्रदा॰ ८१ अरविंदप्रियाय॰ अ
रविंदोद्भवाय॰ अनयःय॰ अर्थाय॰ अक्षोभ्याय॰ अर्चिष्मतेन॰ अनेकमूर्तये॰ अनंतब्रह्मांडपत॰ अनंतशाय॰
अमराधिप॰ अनाधाराय॰ अनंतनाम्ने॰ अनंतश्रिये॰ अक्षराय॰ अमायाय॰ आश्रमस्थाय॰ आश्रमातीता
य॰ अन्नादाय॰ आत्मयोनये॰ अवनीपतये॰ अवनीधरा॰ अनादिने॰ आदित्यायन॰ अमृताय॰ अपवर्ग
प्रदायन॰ अनंताय॰ १०८ इत्यष्टोत्तरशतनामपूजा दशांगंगुग्गुलोद्भूतंचंदनागरुसंयुतम्॥ सर्वेषा-
मुत्तमंधूपंगृह्णाणसुरपूजित॥ यस्युरुषंव्यदधुरितिधूपं॥ आज्यंचवर्तिसंयुक्तंवन्हिनायोजितंमया॥ दी

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पंगृह्याणदेवेशत्रैलोक्यतिमिरापह॥ ब्राह्मणोस्येतिदीपं॥ अन्नंचतुर्विधंस्वादु पयोदधिघृतंतथा॥नाना
व्यंजनशोभाढ्यंनैवेद्यंप्रतिगृह्यताम्॥ चंद्रमामनसइतिनैवेद्यं॥ नैवेद्यमध्येपानीयम्॥उत्तरापोशना-
र्थंतेदद्मितोयंसुवासितम्॥गृह्याणसुमुखोभूत्वाअनंतायनमोनमः॥उत्तरापोशनं॰॥ मुखप्रक्षालन
म्॥ हस्तप्रक्षालनं॰॥ करोद्वर्तनकंदेवमयादत्तंहिभक्तितः॥ चारुचंद्रप्रभांदिव्यंगृहाणजगदीश्वर॥ करो
द्वर्तनं॰॥ इदंफलंमयादेवस्थापितंपुरतस्तव॥ तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि॥ नारीकेलफलं॰
पूगीफलंमहद्दिव्यंनागवल्यादलैर्युतम्॥ कर्पूरेणसमायुक्तंतांबूलंप्रतिगृह्यताम्॥ तांबूलस॰॥ हिरण्य
गर्भेतिदक्षिणां॥ यानिकानिचपापानिजन्मांतरकृतानिच॥ तानितानिविनश्यंतिप्रदक्षिणपदेपदे॥
नाभ्याआसीतिप्रदक्षिणां॰॥ नमस्तेभगवान्भूयोनमस्तेधरणीधर॥ नमस्तेसर्वनागेंद्रनमस्तेमधुसू-
दन॥ सप्तास्येतिनमस्कारं॰॥ नमस्तेदेवदेवेशनमस्तेगरुडध्वज॥ नमस्तेकमलाकांतअनंतायनमोन-
मः॥ यज्ञेनयज्ञमितिमंत्रपुष्पं॥ ॥अथदोरकप्रार्थना॥ ॥अनंतायनमस्तुभ्यंसहस्रशिरसेनमः
नमोस्तुपद्मनाभायनागानांपतयेनमः॥ अनंतःकामदःश्रीमाननंतोमेप्रयच्छतु॥ अनंतोदोररूपेण-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुत्रपौत्रान्प्रवर्धतु॥ ॥इतिदोरकं॥ ॥अथदोरकबंधनमंत्रः॥ ॥अनंतसंसारमहासमुद्रमग्नं
समभ्युद्धरवासुदेव॥ अनंतरूपेविनियोजयस्वह्यनंतसूत्रायनमोनमस्ते॥ ॥इतिबध्वा॥ ॥अथ
जीर्णदोरकविसर्जनमंत्रः॥ ॥नमःसर्वहितानंतजगदानंदकारक॥ जीर्णदोरमसुंदेवविसृज्ये-
हंत्वदाज्ञया॥ ॥इतिविसर्जयेत्॥ ॥अथवायनमंत्रः॥ ॥गृहाणेदंद्विजश्रेष्ठवायनंदक्षिणा
युतम्॥ त्वत्प्रसादादहंदेवमुच्यतेकर्मबंधनात्॥ प्रतिगृण्हद्विजश्रेष्ठअनंतफलदायक॥ पक्वान्नफल
संयुक्तंदक्षिणाघृतसंयुतम्॥ ॥जीर्णदोरकदानमंत्रः॥ ॥अनंतःप्रतिगृण्हातिअनंतोवैददातिच
॥अनंतस्तारकोभाभ्यांअनंतायनमोनमः॥ ॥इतिदद्यात्॥ ॥ततः यथाशक्तिब्राह्मणान्भोजये-
त्॥ अनेनकृतपूजनेनश्रीमदनंतःप्रीयताम्॥ ॥इतिपूजाविधिः॥ ॥छ॥ ॥अथकथा॥ ॥
सूतउवाच॥ ॥पुरातुजान्हवीतीरेधर्मोधर्मपराक्रमः॥ जरासंधवधार्थायराजसूयमुपाक्रमात्॥
१॥ कृष्णेनसहधर्मोसौभीमार्जुनसमन्वितः॥ यज्ञशालांप्रकुर्वीतमहेंद्रालयसन्निभाम्॥ २॥ यज्ञा
र्थान्भूपतीन्सर्वान्समानीयप्रयत्नतः॥ गांधारीतनयोराजाएकदानृपनंदनः॥ ३॥ दुर्योधनइति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रव्यातोसमागत्यमरवालयम्॥ दृष्ट्वादुर्योधनेनात्रप्रांगणंजलसन्निभम्॥४॥ऊर्ध्वंकृत्वातुवस्त्राणित-
न्नगछन्शनैःशनैः॥स्मितवक्त्राश्चताःसर्वाद्रौपद्यादिवरांगनाः॥५॥दुर्योधनस्ततोगच्छन्जलमध्ये
पपातह॥पुनःसर्वेनृपाश्चैववक्रषयश्चतपोधनाः॥६॥उपहासंचचक्रुस्ताद्रौपद्यादिसुलोचनाः॥म-
हाराजोधिराजोसौमहान्क्रोधपरायणः॥७॥विनिर्गत्यस्वकंराष्ट्रंमातुलेनाहृतोनृपः॥तस्मिन्कालेतु
शकुनिःप्रोवाचमधुरंवचः॥८॥शृंचराजन्महारोषंपुरतःकार्यगौरवात्॥गंतुमुत्तिष्ठराजेंद्रसत्रात्
स्वसदनंप्रति॥९॥तथेत्युक्त्वामहाराजःसमागत्यमरवालयात्॥निरगछन्नृपाःसर्वेत्यक्त्वायज्ञंस्वरा-
ष्ट्रकम्॥१०॥दुर्योधनाराजभिश्चसमागत्यगजाह्वयम्॥आनीयपांडुपुत्रांस्तान्धर्मभीमार्जुनान्वरान्॥
११॥द्यूतारंभमकुरुतस्वंराज्यंप्राप्नुयात्ततः॥द्यूतेनैवजिताःसर्वेपांडवावीतकल्मषाः॥१२॥ततोरण्यांत
रेगत्वावर्तंतेवनचारिणः॥ततोवृत्तांतमापन्नोभ्रातृभिःसहपांडवः॥१३॥ ॥सूतउवाच॥ ॥अरण्ये
वर्तमानास्तेपांडवादुःखकर्शिताः॥कृष्णंदृष्ट्वामहात्मानंप्रणिपत्ययथाक्रमम्॥१४॥ ॥युधिष्ठिरउवा-
च॥ ॥अहंदुःखीहसंजातोभ्रातृभिःपरिवारितः॥कथंमुक्तिर्वदास्माकंमनंतादुःखसागरात्॥१५॥कं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवंपूजयिष्यामिराज्यंप्राप्स्यामिउत्तमम्॥अथवाकिंव्रतंकृत्वात्वत्प्रसादाद्भवेद्धितम्॥१६॥ ॥श्रीकृष्णउवा
च॥ ॥अनंतव्रतमस्त्येकंतिथावस्यामनुत्तमम्॥सर्वपापहरन्नृणांस्त्रीणांचैवयुधिष्ठिर॥१७॥ शुक्लप
क्षेचतुर्दश्यांमासिभाद्रपदेभवेत्॥ तस्यानुष्ठानमात्रेणसर्वपापंव्यपोहति॥१८॥ ॥युधिष्ठिरउवाच॥
कृष्णकोयमनंतेतिप्रोच्यतेयस्त्वयाविभो॥ किंशेषनागआहोस्विअनंतस्तक्षकस्मृतः॥१९॥ परमात्माथ-
वानंतउताहोब्रह्मगीयते॥कएषोनंतसंज्ञोवैतथ्यंमेब्रूहिकेशव॥२०॥ ॥कृष्णउवाच॥ ॥अनंतइ-
त्यहंपार्थममरूपंनिबोधत॥ आदित्यादिग्रहात्मासौयःकालइतिपठ्यते॥२१॥ कलाकाष्ठामुहूर्तादिदिवारा
त्रिशरीरवान्॥पक्षमासर्तुवर्षाणियुगकालव्यवस्थया॥२२॥ योयंकालोमयाख्यातोसोनंतोइतिकीर्त्यते॥
सोहंकृष्णोवतीर्णोत्रभूभारोत्तारणायच॥२३॥ दानवानांवधार्थायवसुदेवकुलोद्भवम्॥मांविद्धिसततंपार्थ
साधूनांपालनायच॥२४॥अनादिमध्यनिधनंकृष्णंविष्णुंहरिंशिवम्॥वैकुंठंभास्करंसोमंसर्वव्यापिनमी
श्वरम्॥२५॥विश्वरूपंमहाबाहोयोगिध्येयमनुत्तमम्॥विश्वरूपमनंतंचयस्मिन्निंद्राश्चतुर्दश॥२६॥वस
वोद्वादशादित्यारुद्राएकादशस्मृताः॥सप्तर्षयःसमुद्राश्चपर्वताःसरितोद्रुमाः॥२७॥नक्षत्राणिदिशोभू-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिः पातालंभूर्भुवादिकम्॥ माकुरुक्षेत्रसंदेहंसोहंपार्थनसंशयः॥२८॥ ॥युधिष्ठिरउ०॥ ॥अनंतव्रतमाहा-
त्म्यंविधिंवदविदांवर॥ किंपुण्यंकिंफलंचास्यअनुष्ठानवतांनृणाम्॥ २९॥ केनचादौपुराचीर्णंमर्त्येकेनप्रका-
शितम्॥ एवंसविस्तरंसर्वंब्रूह्यनंतव्रतंमम॥३०॥ ॥कृष्णउ०॥ ॥आसीत्पुराकृतयुगेसुमंतुर्नामवैद्विजः॥
वसिष्ठगोत्रसंभूतांसुरूपांचभृगोःसुताम्॥ ३१॥ दीक्षानाम्नींचोपयेमेवेदोक्तविधिनानृप॥ तस्याःकालेनसं
जातादुहितानंतलक्षणा॥ ३२॥ शीलानाम्नीसुशीलासावर्धतेपितृवेश्मनि॥ मातात्वतस्याःकालेनज्वरदाहेन-
पीडिता॥३३॥ विनष्टासानदीतोयेययौस्वर्गंपतिव्रता॥ सुमंतुस्ततोन्यांवैधर्मपुंसःसुतांपुनः॥ ३४॥ उपयेमेवि
धानेनदुःशीलांनामनामतः॥ दुःशीलांकर्कशींचंडींनित्यंकलहकारिणीम्॥ ३५॥ सापिशीलापितुर्गेहेगृहार्चन
परावभौ॥ कुड्यस्तंभबहिर्द्वारदेहलीतोरणादिषु॥ ३६॥ वर्णकैश्चित्रमकरोन्नीलपीतसितासितैः॥ स्वस्तिकैः
शंखपद्मैश्चअर्चयंतीपुनःपुनः॥ ३७॥ ततःकालेबहुगतेकौमारवशवर्तिनी॥ एवंसावर्द्धतेशीलापितृवेश्मनि
मंगला॥ ३८॥ तांदृष्ट्वाचिंतयामासवरानन्नुगणान्भुवि॥ कस्मैदेयामयाकन्याविचार्येतिसुदुःखितः॥ ३९॥ ए ९
तस्मिन्नेवकालेतुमुनिर्वेदविदांवरः॥ कन्यार्थीचागतःश्रीमान्कौंडिण्योमुनिसत्तमः॥४०॥ उवाचरूपसंपन्नां-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वदीयांतनयावृणे॥ पितादर्दौद्विजेंद्रायकौंडिण्यायशुभेदिने॥ ४१॥ गृह्योक्तविधिनापार्थविवाहमकरोत्तदा॥ मंगला
चारनिर्घोषंतत्रकुर्वंतियोषितः॥ ४२॥ ब्राह्मणाःस्वस्तिवचनंजयघोषंचबंदिनः॥ निवर्त्योद्वाहिकंसर्वंप्रोक्तवान्क
र्केशांद्विजः॥ ४३॥ ॥सुमंतुरु०॥ ॥ किंचिद्दायादिकंदेयंजामातुःपरितोषकम्॥ तच्छ्रुत्वाकर्कशाक्रुद्धाप्रोत्सा
र्यगृहमंडनम्॥ ४४॥ पेटकेसुस्थिरंबध्वास्वगृहंगम्यतामिति॥ उवाचवित्तंनैवास्तिगृहेपश्ययदिस्थितम्॥
४५॥ तच्छ्रुत्वाविमनाःपार्थसंयतात्मामुनिस्तदा॥ भोज्यावशिष्टचूर्णेनपाथेयंचचकारसा॥ ४६॥ कौंडिण्यो
पिविवाह्यैतांपथिगच्छन्शनैःशनैः॥ शीलांसुमंतोरादायनवोढांगोरथेनहि॥ ४७॥ ददर्शयमुनांपुण्यांतामुत्ती
र्यतटेरथम्॥ संस्थाप्यावश्यकंकर्तुंगतःशिष्यान्नियुज्यवै॥ ४८॥ मध्याह्नेभोज्यवेलायांसमुत्तीर्यसरित्तटे॥ द
दर्शशीलासास्त्रीणांसमूहंरक्तवाससाम्॥ ४९॥ चतुर्दश्यामर्चयंतंभक्त्यादेवंजनार्दनम्॥ उपगम्यशनैःशीला
पप्रच्छस्त्रीकदंबकम्॥ ५०॥ आर्याःकिमेतन्मेब्रूतकिन्नामव्रतमीदृशम्॥ ताऊचुर्योषितस्तांतुशीलांशीलविभूष
णाम्॥ ५१॥ अनंतव्रतमेतद्धिव्रतेनंतस्तुपूज्यते॥ साब्रवीदहमप्येतत्करिष्येव्रतमुत्तमम्॥ ५२॥ विधानंकीदृशं
तत्रकिंदानंकोत्रपूज्यते॥ ५३॥ ॥स्त्रियऊचुः॥ ॥शीलेसदन्नप्रस्थस्यपुन्नाम्नासंस्कृतस्यच॥ अर्धंविप्रा

For Private and Personal Use Only

यदातव्यमर्धमात्मनिभोजनम्॥५४॥शक्त्याचदक्षिणांदद्याद्वित्तशाठ्यविवर्जितः॥कर्तव्यंयत्सरित्तीरेकथांश्रु
त्वाहरेरिमाम्॥५५॥शेषंकुशमयंकृत्वावंशपात्रेनिधायच॥स्नात्वानंतंसमभ्यर्च्यमंडलेगंधदीपकैः॥५६॥पु-
ष्पैर्धूपैश्चनैवेद्यैर्नानापक्वान्नसंयुतैः॥तस्याग्रतोदृढंसूत्रंकुंकुमाक्तंसदोरकम्॥५७॥चतुर्दशग्रंथिसुतंवामेक
रतलेन्यसेत्॥अनंतसंसारमहासमुद्रमग्नंसमभ्युद्धरवासुदेव॥अनंतरूपेविनियोजयस्वह्यनंतसूत्रायनमोन
मस्ते॥५८॥अनंतंचकरेबध्वाभोक्तव्यंस्वस्थमानसैः॥ध्यात्वानारायणंदेवमनंतंविश्वरूपिणम्॥५९॥भुक्त्वा
चांतेव्रजेद्वेश्मभद्रेप्रोक्तंव्रतंतव॥६०॥ ॥कृष्णउवाच॥ ॥एवमाकर्ण्यराजेंद्रप्रहृष्टेनांतरात्मना॥सापि
चक्रेव्रतंशीलाकरेबध्वासदोरकम्॥६१॥चतुर्दशग्रंथियुतंवामेबाहौयथोदितम्॥पाथेयमर्धंविप्रायदत्वाभुक्त्वा
स्वयंततः॥६२॥पुनर्जगामसंहृष्टागोरथेनस्वकंगृहम्॥भर्त्रासहैवशनकैःप्रत्ययस्तत्क्षणादभूत्॥६३॥तेना
नंतव्रतेनास्यबभौगोधनसंकुलम्॥गृहाश्रमंश्रियाजुष्टंधनधान्यसमन्वितम्॥६४॥आकुलंव्याकुलंरम्यंस-
र्वदातिथिपूजनैः॥सापिमाणिक्यकांचीभिर्मुक्ताहारैर्विभूषिता॥६५॥देवांगवस्त्रसंछन्नासावित्रीप्रतिमाभ
वत्॥विचचारगृहेभर्त्तुःसमीपेसुस्वरूपिणी॥६६॥कदाचिदुपविष्टयादृष्टोबद्धःसदोरकः॥शीलायाहस्त

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलेतुभर्त्रातस्यद्विजन्मना॥६७॥किमिदंदोरकंशीलेममवश्यायकल्पितम्॥धृतंसुदोरकंत्वेतत्किमर्थंब्रूहितत्त्वतः॥
६८॥यस्यप्रसादात्सकलाधनधान्यादिसंपदः॥लभ्यंतेमानवैश्चापिसोनंतोयंमयाधृतः॥६९॥शीलायास्तद्वचःश्रु
त्वाभर्त्रातेनद्विजन्मना॥श्रीमदांधेनकौरव्यसाक्षेपंत्रोटितस्तदा॥७०॥कोनंतइतिमूढेनजल्पतापापकारिणा॥क्षि
प्तोज्वालाकुलेवन्हौहाहाकृत्वाप्रधावती॥७१॥शीलागृहीत्वातत्सूत्रंक्षीरमध्येसमाक्षिपत्॥तेनकर्मविपाकेन
साश्रीस्तस्यक्षयंगता॥७२॥गोधनंतस्करैर्नीतंगृहंदग्धंधनंगतम्॥यद्यथैवागतंगेहेतत्तथैवपुनर्गतम्॥७३॥
स्वजनैःकलहोनित्यंबंधुभिस्ताडनंतथा॥अनंताक्षेपदोषेणदारिद्र्यंपतितंगृहे॥७४॥नकश्चिद्वदतेलोकेतेनसा
र्धंयुधिष्ठिर॥शरीरेणातिसंतप्तोमनसाप्यतिदुःखितः॥निर्वेदंपरमंप्राप्तःकौंडिण्यःप्राहतांप्रियाम्॥७५॥ ॥कौं
डिण्यउ०॥ ॥शीलेममेदमुत्पन्नंसहसाशोककारणम्॥येनातिदुःखितोस्माकंजातःसर्वधनक्षयः॥७६॥स्वज
नैःकलहोगेहनकश्चिन्मांप्रभाषते॥शरीरेनित्यसंतापःखेदश्चेतसिदारुणः॥जानासिदुर्नयःकोत्रकिंकृत्वासुकृतं
भवेत्॥७७॥ ॥शीलोवाच॥ ॥प्रत्युवाचाथतंशीलासुशीलाशीलमंडना॥प्रायोनंतकृताक्षेपपापसंभवजंफ
लं॥७८॥भविष्यतिमहाभागतदर्थंयत्नमाचर॥एवमुक्तःसविप्रर्षिर्जगाममनसाहरिम्॥७९॥निर्वेदंनिर्जगा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माथकौंडिन्यःप्रागतोवनम्॥तपसेकृतसंकल्पोवाशुभसोद्विजोत्तमः॥८०॥मनसाध्यायमानंतंकद्रक्ष्यामिन्वनंतंवि
भुं॥यस्यप्रसादात्संजातमाक्षेपान्निधनंगतम्॥८१॥धनादिकंममातीवस्फुरवदुःखप्रदायकम्॥एवंसंचिंतयन्
सोथबभ्रामविपिनेवने॥८२॥तत्रापश्यन्महाचूतंपुष्पितंफलितंद्रुमम्॥वर्जितंपक्षिसंघातैःकीटकोटीसमावृत
म्॥८३॥तमपृच्छद्विजोनंतःक्वचिदृष्टोमहाद्रुम॥ब्रूहिसौम्यममातीवदुःखंचेतसिवर्तते॥सोब्रवीद्वनानंतोक्वचि
दृष्टोमयाद्विज॥८४॥एवंनिराकृतस्तेनसंजगामाथदुःखितः॥क्वद्रक्ष्यामीतिगच्छन्सगांददर्शसवत्सकां॥८५॥व-
नमध्येप्रधावंतीमितश्चेतश्चपांडव॥सोब्रवीद्धेनुकेब्रूहियद्यनंतस्त्वयेक्षितः॥८६॥ ॥गौतम्युवाच॥ ॥गौरुवा
चाथकौंडिन्यंनानंतंवेद्म्यहंद्विज॥ततोव्रजन्ददर्शाग्रेवृषभंशाद्वलेस्थितम्॥दृष्ट्वापप्रच्छगोस्वामिन्नानंतोवीक्षित
स्त्वया॥८७॥वृषभस्तमुवाचेदंनानंतोवीक्षितोमया॥ततोव्रजन्ददर्शाग्रेरम्यंपुष्करिणीद्वयम्॥८८॥अन्योन्यजल
कल्लोलैर्वीचीपर्यंतसंगमम्॥छन्नंकमलकल्हारैःकुमुदोत्पलमंडितम्॥८९॥सेवितंभ्रमरैर्हंसैश्चक्रकारंडकैर्ब-
कैः॥तेअपृच्छद्विजोनंतोयुवाभ्यांनोपलक्षितः॥९०॥ऊचतुस्तेपुष्करिण्यौनानंतोवीक्षितोद्विज॥ततोव्रजन्ददर्शा
ग्रेगर्दभंकुंजरंतथा॥९१॥तावपृच्छद्विजोनंतोभवद्भ्यांनोपलक्षितः॥एवंसपृच्छन्नष्टाशस्तत्रैवनिषसादह॥९२॥कौं



For Private and Personal Use Only

डिन्योविह्वलीभूतोनिराशोजीवितोनृप॥दीर्घमुष्णंचनिःश्वस्यपपातभुविभारत॥९३॥प्राप्यसंज्ञामनंतेतिजल्प-
न्नुत्थायसद्विजः॥नूनंत्यक्ष्याम्यहंप्राणानितिसंकल्प्यचेतसि॥९४॥उत्थायोद्बध्यवृक्षेस्मिंस्तावद्भरतसत्तम॥कृ-
पयानंतदेवोपिप्रत्यक्षंसमजायत॥९५॥वृद्धब्राह्मणरूपेणइतएहीत्युवाचतम्॥प्रगृह्यदक्षिणेपाणौगुहायां-
प्रविवेशतम्॥९६॥तांपुरींदर्शयामासदिव्यनारीनरैर्युताम्॥यस्यांनिविष्टमात्मानंदिव्यसिंहासनेशुभे॥९७
पार्श्वस्थशंखचक्राब्जगदागरुडशोभितम्॥दर्शयामासविप्रायविश्वरूपमनंतकम्॥९९॥विभूतिभेदैश्चा-
नंतैरनंतममितौजसम्॥कौस्तुभेनविराजंतंवनमालाविभूषितम्॥१००॥तंदृष्ट्वाताहशंरूपमनंतमपरा-
जितम्॥वंद्यमानोजगादोच्चैर्जयशब्दपुरःसरम्॥१॥पापोहंपापकर्माहंपापात्मापापसंभवः॥त्राहिमांपुंडरी-
काक्षसर्वपापहरोभव॥२॥तच्छ्रुत्वानंतदेवेशःप्राहसुस्निग्धयागिरा॥माभैस्त्वंब्रूहिविप्रेंद्रयत्तेमनसिवर्त-
ते॥३॥ ॥कौंडिण्यउ०॥ ॥मयाभूत्यवलिप्तेनत्रोटितोनंतदोरकः॥तेनपापविपाकेनभूतिर्मेप्रलयंगता॥४॥
स्वजनैःकलहोगेहेनकश्चिन्मांप्रभाषते॥निर्वेदाद्भ्रमतेरण्येतवदर्शनकांक्षया॥५॥कृपयादेवदेवेशत्वयात्मा
संप्रदर्शितः॥तस्यपापस्यमेशांतिंकारुण्याद्वक्तुमर्हसि॥६॥ ॥श्रीकृष्णउ०॥ ॥तच्छ्रुत्वानंतदेवेशउवाच-

द्विजसत्तमम्॥भक्तथासंतोषितोदेवः किंनदद्याद्युधिष्ठिर॥७॥ ॥अनंतउ०॥ ॥स्वगृहेगच्छकौंडण्यमविलंबं
कुरुद्विज॥चरानंतव्रतंभक्त्यानववर्षाणिपंचच॥८॥सर्वपापविशुद्धात्माप्राप्स्यसेसिद्धिमुत्तमाम्॥पुत्रपौत्रान्स
मुत्पाद्यभुक्त्वाभोगान्यसेप्सितान्॥९॥अंतेमत्स्मरणंप्राप्यमामुपेष्यस्यसंशयम्॥अन्यंचतेवरंददामिसर्वलो-
कोपकारकम्॥१०॥इदमाख्यानकवरंशीलानंतव्रतादिकम्॥करिष्यतिनरोयस्तुकुर्वन्व्रतमिदंशुभम्॥११॥सो
चिरात्पापनिर्मुक्तः प्राप्नोतिपरमांगतिम्॥गच्छविप्रगृहंशीघ्रंयथायेनागतोह्यसि॥१२॥ ॥कौंडिण्यउ०॥ ॥स्वा
मिन्पृच्छामितेब्रूहिकिंचित्कौतूहलंमया॥अरण्येभ्रमनादृष्टंतद्दद्स्वजगद्गुरो॥१३॥ यश्चूतवृक्षकस्तत्रकागौः
कोवृषभस्तथा॥कमलोत्पलकल्हारैः शोभितंसुमनोहरम्॥१४॥मयादृष्टंमहारण्येकिंतत्पुष्करिणीद्वयम्॥कौ
रवःकुंजरःकोसौकोसौवृद्धोद्विजोत्तमः॥१५॥ ॥अनंतउ०॥ ॥सच्चूतवृक्षोविप्रोसौविद्यावेदविशारदः॥वि-
द्यानदत्ताशिष्येभ्यस्तेनसौतरुतांगतः॥१६॥यागौर्वसुंधरादृष्टापूर्वंसाबीजहारिणी॥वृषोधर्मस्त्वयादृष्टः शाद्
लंसत्यमास्थितः॥१७॥धर्माधर्मव्यवस्थानंतत्रपुष्करिणीद्वयम्॥ब्राह्मण्योकेचिदप्यास्तांभगिन्यौतेपरस्प
रम्॥१८॥धर्माधर्मादिथत्किंचित्तन्निवेदयतोमिथः॥विप्रायवेदविदुषेनदत्तंदुर्बलायवै॥१९॥भिक्षादत्तान-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चार्थिभ्यः स्तेन पापेन कर्मणा ॥ वीचीकल्लोलमालाभिर्गच्छतस्ते परस्परम् ॥ २० ॥ खरः क्रोधस्तथा दृष्टः कुंजरो मद
उच्यते ॥ ब्राह्मणोसावनंतोहं गुहा संसारगह्वरम् ॥ २१ ॥ इत्युक्त्वा देवदेवेशस्तत्रैवांतरधीयत ॥ स्वप्नप्रायं ततो
दृष्ट्वा ततः स्वगृहमागतः ॥ २२ ॥ कृत्वानंतव्रतं सम्यक् नववर्षाणि पंच च ॥ भुक्त्वा सर्वमनंतेन यथोक्तं पांडुनं
दन ॥ २३ ॥ अंते च स्मरणं प्राप्य गतोनंतपुरे द्विजः ॥ तथा त्वमसि राजर्षे कथां शृण्वन् व्रतं कुरु ॥ २४ ॥ प्राप्स्यसे
चिंतितं सर्वमनंतस्य वचो यथा ॥ तद्वच्चतुर्दशे वर्षे फलं प्राप्तं द्विजन्मना ॥ २५ ॥ वर्षैकेन तदाप्नोति कृत्वोपाख्या
नकव्रतम् ॥ एतत्ते कथितं भूप व्रतानामुत्तमव्रतम् ॥ २६ ॥ यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ येपि शृ
ण्वंति सततं पठ्यमानं पठंति ये ॥ २७ ॥ तेपि पापविनिर्मुक्ताः प्राप्स्यंति च हरेः पदम् ॥ संसारगह्वरगुहासु सु
खं विहर्तुं वांछंति ये कुरुकुलोद्भव शुद्धसत्वाः ॥ संपूज्य च त्रिभुवनेशमनंतदेवं बध्नंति दक्षिणकरे वरदोरकं
ते ॥ २८ ॥ ॥ इति अनंतव्रतकथा समाप्ता ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ शुभं भवतु ॥ ॥ 

मुंबईत बापुहरशेट देवळेकर यांणीं आपले छापखान्यांत छापिलें. शके १७८० कालयुक्तनामसंवत् ठिकाणा हनुमा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति अनंतव्रतकथासमाप्त॰

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only